श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीपराङ्कुशयतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीलक्ष्मीनृसिंह प्रपत्तिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीनृसिंह प्रपत्तिः ॥

श्री श्रीनिवासाह्वय योगिवर्यं नारायणं योगिवरं तथैव।
श्री योगिवर्य रघुवीर वेदकोटीरसंज्ञं गुरुमाश्रयामि॥ १ ॥

अहोबिले गारुडशैलमध्ये कृपावशात् कल्पित सन्निधानम्।
लक्ष्म्या समालिङ्गित वामभागं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ २ ॥

श्रीवण् शठाराति यतीन्द्रमाद्यं प्रेम्णा स्वयं प्रेषमनु प्रदाय।
स्वाराधने प्रेरयति स्म यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ३ ॥

सर्वस्य लोकस्य समीहितानां प्रदान दीक्षा वशतस्सदैव।
श्रिया समेतं श्रितदोषहन्त्र्या लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ४ ॥

यस्याभवत् भक्तजनार्तिहन्तुः पितृत्वमन्येष्वविचार्य तूर्णं।
स्तम्भेवतारस्तमनन्यलभ्यं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ५ ॥

यमीक्षितुं देवगणोऽतिरुष्टं शत्रौ न शक्नोति चतुर्मुखादिः।
प्रसादितो भक्तजनेन यस्तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ६ ॥

वामत्वमद्य त्यज संश्रितेषु नास्तीह कश्चित्किल नापराधी।
लक्ष्म्येति वामाङ्कगयोच्यमानं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ७ ॥

श्री वीरवद्राघव वेदमौळिं योगीन्द्रक्लृप्तैश्शुभतापपुण्ड्रैः।
नामादिभिर्मां युतमातनोद्यस्तं श्रीनृसिंहं शरणं प्रपद्ये॥ ८ ॥

श्रीमद्रहस्यत्रयसारपाठप्रारंभकाले तव सर्वसिद्धिः।
स्यादित्युपश्रुत्यभिधायकं मे लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ९ ॥

भाष्यप्रदानावसरे तु वीररघूद्वहाम्नायशिखार्य रूपी।
स्वप्नागतो भाष्यमदत्त यो मे तं श्रीनृसिंहं शरणं प्रपद्ये॥ १० ॥

यच्छ्रीनिवासाखय मुनीन्द्रतो मां संप्राप्त वेदान्तयुगं व्यतानीत्।
तदर्पितं स्वीकृतमद्भरं तं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ ११ ॥

स्वप्ने रमावासमुनीन्द्ररूपी स्वयं समागत्य ममापि देवः।
त्रिदण्डकाषायमदान्मुदा यस्तं श्रीनृसिंहं शरणं प्रपद्ये॥ १२ ॥

आराधनं स्वस्य कथं मयेति भीतं सदा पद्मलता मुखेन।
आश्वास्य मामप्यकरोत् कृतार्थं लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ १३ ॥

शठारिनारायणयोगिवर्यपराङ्कुशस्वामि पराङ्कुशाद्यैः।
यः पूजितः श्रीनिधियोगिमुख्यैः तं श्रीनृसिंहं शरणं प्रपद्ये॥ १४ ॥

नारायण श्रीरघुवीर वेदकोटीर नारायण मानिवासैः।
योगीश्वरै रन्वह मर्चितो यस्तं श्रीनृसिंहं शरणं प्रपद्ये॥ १५ ॥

त्वद्दत्तवाचा तव किङ्करेण त्वत्प्रीतिकामेन मया कृतेन।
स्तोत्रेण लक्ष्मीनृहरेः स विष्णुः प्रीतो भव त्वं करुणार्द्रदृष्टिः॥ १६ ॥

पराङ्कुशाख्येन तपोधनेन भक्त्या नृसिंहस्य कृता प्रपत्तिः।
पापठ्यते येन भवेत् स तस्य पूर्णं कृपापूर्णकटाक्षपात्रम्॥ १७ ॥

॥ इति श्रीलक्ष्मीनृसिंह प्रपत्तिः समाप्ता ॥